## द्वादशः पाठः

# प्रहेलिकाः



अपदं दूरगामी च, साक्षरं न च पण्डितः।
अमुखं स्फुटवक्ता च, मां जानाति सः पण्डितः॥1॥

अहं पादाभ्यां विना दूरं गच्छामि। अक्षरयुक्तः किन्तु पण्डितः नास्मि। अहं मुखेन विना स्पष्टं वदामि। यः मां जानाति सः पण्डितः।



न तस्यादिः न तस्यान्तः, मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति, यदि जानासि तद् वद॥2॥

'न' तस्य आदिः। 'न' तस्य अन्तः। मध्ये 'य' अस्ति। मम अपि अस्ति। तव अपि अस्ति। यदि जानासि तद् वद।

सुप्तोऽपि नेत्रे न निमीलयामि, जलस्य मध्ये निवसामि नित्यम्।
स्वजातिजीवाः मम भोजनानि, वदन्तु मान्याः ! मम नामधेयम्॥3॥



अहं सुप्ते अपि नेत्रे न निमीलयामि। जलस्य मध्ये एव निवसामि। स्वजातिजीवाः मम भोजनानि सन्ति। मान्याः! मम नाम वदन्तु।



तिष्ठामि पादेन बको न पङ्गुः, दाता फलानां न कृतिर्न यत्नः।
मौनेन जीवामि मुनिर्न मूकः, सेव्योऽस्मि कोऽहं नृपतिर्न देवः॥4॥

अहं पादेन तिष्ठामि किन्तु न बकः, न पङ्गुः। अहं फलानां दाता; किन्तु न कृतिः, न यत्नः। मौनेन जीवामि; किन्तु न मुनिः, न मूकः। सेव्यः अस्मि अहं; किन्तु न नृपतिः, न देवः। अहं कः?

वृक्षाग्रवासी न च पक्षिराजः, त्रिनेत्रधारी न च शूलपाणिः।
त्वग्वस्त्रधारी न च सिद्धयोगी, जलं च विभ्रन्न घटो न मेघः॥5॥



अहं वृक्षाग्रवासी, किन्तु न पक्षिराजः। अहं त्रिनेत्रधारी; किन्तु न शूलपाणिः। अहं त्वग्वस्त्रधारी किन्तु न सिद्धयोगी। जलं विभ्रन् किन्तु न घटः, न मेघः।

## शब्दार्थाः

| | | | |
|---|---|---|---|
| अपदम् (वि.) | = बिना पैर वाले | दूरयानम् (न.पु.) | = दूर तक जाने वाला वाहन |
| साक्षरम् (वि.) | = अक्षरयुक्त | अमुखम् (वि.) | = बिना मुखवाले |
| स्फुटवक्ता | = स्पष्ट बोलने वाला | तस्यादिः | = उसका प्रारम्भ |
| तस्यान्तः | = उसका अन्त | ममाप्यस्ति | = मेरा भी है |
| निमीलयामि | = मैं मूँद लेता हूँ | वदन्तु | = कहें |
| नामधेयम् | = नाम | कृतिः | = रचना |
| सेव्योऽस्मि | = सेवा योग्य हूँ | वृक्षाग्रवासी | = वृक्ष के ऊपर रहने वाला |
| पक्षिराजः | = गरुड | विभ्रन् | = धारण करता हुआ |
| शूलपाणिः (पु.) | = हाथ में शूल रखने वाले शंकर | | |
| त्वक् | = वृक्ष की छाल | | |
| त्वग्वस्त्रधारी | = पेड़ की छाल के वस्त्र को धारण करने वाले | | |

## अभ्यासः

**1. एकपदेन उत्तरं लिखत–**

(क) सुप्तोऽपि नेत्रे कः न निमीलयति?

(ख) फलानां दाता कः अस्ति?

(ग) पक्षिराजः कः अस्ति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) मूकः कथं जीवति?

(ख) एकेन पादेन कः तिष्ठति?

(ग) नारिकेलफले कति नेत्राणि भवन्ति?

**3. रिक्तस्थानानि पूरयत–**

(पण्डितः, मम, मूकः, शूलपाणिः, तस्यादिः)

(क) न ............. न तस्यान्तः।

(ख) साक्षरं न च ................।

(ग) त्रिनेत्रधारी न च ............।

(घ) स्वजातिजीवाः ................ भोजनानि।

(ङ) मौनेन जीवामि मुनिर्न ..............।

4. **उचितं मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | वृक्षाग्रवासी न च पक्षिराजः | दाता फलानां न कृतिर्न यत्नः। |
| (ख) | अपदं दूरयानञ्च | जलस्य मध्ये निवसामि नित्यम्। |
| (ग) | तिष्ठामि पादेन बको न पङ्गुः | त्रिनेत्रधारी न च शूलपाणिः। |
| (घ) | सुप्तोऽपि नेत्रे न निमीलयामि | मध्ये यस्तस्य तिष्ठति। |
| (ङ) | न तस्यादिः न तस्यान्तः | साक्षरं न च पण्डितः। |

5. **सन्धिविच्छेदं कुरुत–**

(क) तस्यादिः ........... + ............

(ख) तस्यान्तः ........... + ............

(ग) वृक्षाग्रवासी ........... + ............

(घ) ममाप्यस्ति ........... + ............

(ङ) तवाप्यस्ति ........... + ............

6. **समानार्थकपदानां मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | पादाभ्यां | भूपतिः |
| (ख) | नेत्रे | जलदः |
| (ग) | नृपतिः | नयने |
| (घ) | मेघः | चरणाभ्याम् |

7. **विपरीतार्थकपदानां मेलनं कुरुत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | आदिः | उन्मीलनं |
| (ख) | तिष्ठामि | वाचालः |
| (ग) | निमीलनं | गच्छामि |
| (घ) | मूकः | अन्तः |

**8. उदाहरणानुगुणम् अन्वयपूर्तिं कुरुत–**

न तस्यादिः न तस्यान्तः, मध्ये यस्तस्य तिष्ठति।
ममाप्यस्ति तवाप्यस्ति, यदि जानासि तद् वद।।

**अन्वयः-** न तस्य आदिः, न तस्य अन्तः, तस्य मध्ये यः तिष्ठति, मम अपि अस्ति, तव अपि अस्ति, यदि जानासि तद् वद।

(क) सुप्तः ......... नेत्रे न निमीलयामि, जलस्य ......... नित्यं ........., मम ......... स्वजातिजीवाः, मान्या! ......... नामधेयं .........।

(ख) ......... तिष्ठामि बकः न ........., दाता ......... न कृतिः ......... यत्नः, मौनेन ........... मुनिः ......... मूकः, सेव्यः ......... कः नृपतिः ........... देवः।

**योग्यताविस्तारः –**

- प्रहेलिकाः कण्ठस्थीकुरुत।
- नूतनानां प्रहेलिकानां सङ्कलनं कुरुत।

*प्रहेलिका बुद्धिमतां विनोदः।*